Checked 2012
कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक
हस्तलिखित संग्रह
दाखल क्र M718 विषय वैदिक
नाव. शिक्षा-चातुर्यम
लेखक/लिपीकार
पृष्ठ २२ काळ सन 1786 पूर्ण/अपूर्ण

श्रीगणेशाय नमः ॥ ॐ ॥ प्रतिस्यंनहिदेवोयेमहोयेउमायेसुभ्राः पंच ५ येनाकस्यघईं स्वयंत्यायेतन्वंत्युभित्वाश्च
त्वारिं४ ॥ यत्र्यग्नावायचह्वाविवयत्रनार्यत्रमंथांयद्विद्धिसंपंच ५ यद्विद्धिसत्यगिप्रिन्वाजानांनिषापयासस्संतु
त्याःसमिद्रूपतातिकुंडूणाच्यासर्वेपरिक्रोशंसप्त ७ त्वमग्नेप्रथमोअंगिराऋषिरंगिरस्तमःकविर्मातरिश्वने
मनवेवृषभःपंच ५ त्वमग्नेवृजिनवर्त्तनिंत्वंतमग्नेत्वन्नोअग्नेसनयेपित्रोरुपस्थेप्रमतिःपंच ५ त्वामग्नेप्रथ
मतवेदेवयज्यवेदरूरांसायप्रयतदक्षिणंपंच ५ ॥ अभित्वातमुत्वावाजसातमवृत्रहन्तमृमवोचामरहू
गणाःपंच ५ इत्वाहिसत्वाप्रेहूभीहिनिरिंद्रेद्रोवृत्रस्यधोंदोतःपंच ५ अधिसानाविंद्रतुभ्यंवितेवज्राःसःसह
स्वंसाकमिंद्रोवृत्रस्यतविषीपंच ५ इमेचिन्त्वेवपसायद्वृत्रमभिष्टनेतेनहिनुयायामयर्वोःषट् ६ ॥ उषाघ्व
क्षंनमीमदंतस्कसंदरोत्वासघातंपुरूस्तेनयुनजिमतेषट् ६ नकिष्टुघएकेइत्कदामत्तेंयथ्विद्धित्वास्वाद
रिस्याःपंच ५ ताअस्यपृश्नानानमेसासमहंद्रोदधीचस्त्रयः ३ अग्नीषोमाविमंपोअघवायआहुतिंचेति
नघ्नुवंमताभ्यान्यंदिवःषट् ६ अग्नीषोमाहविषोयोअग्नीषोमासवेदसावनेनविमानिनःपिष्टतंषट् ६ इमंस्तो
मंयस्मैत्वंरोकेमत्वाभरामेध्मंविशंगोपाःपंच ५ त्वमध्वर्युर्योविश्वतःपूर्वोदेवावध्वैदुःशंसंयदस्युक्ताःपंच

१

५ अधस्वनादुत मित्रस्य देवो देवानां तत्ते भद्रं यस्मै त्वं सुद्रविणो: स त्वमग्ने: षट् ६ स प्रत्नथा स पूर्व्यो तमीळ
त समातरिश्वा नक्तोषासा: पंच ५ रायो बुध्नो नूच पुराद्रविणोदा एवा नेश्चत्वारि ४ अप न: शुक्षेत्रिया प्र यद्भं
दिष्ठं प्र यत्ते प्र यदग्ने त्वं हि विश्वतो द्विषो न: स न: सिंधुमिवाष्टौ ८ स यो वृषा यस्या नो त्वादि वो न यस्य सो अंगिराभि:
स सूनुभि: पंच ५ स मन्युमी: स्तमूतयस्त्वमस्मं तु स सस्वेन सग्नाभिभि: पंच ५ स ज्ञामिभि: स वज्रभृत्तस्यव
ज्रो यस्याजस्त्वं नयस्पूद वा: पंच ५ प्र मंदिने यो व्यंसं यस्य द्यावापृथिवी यो अश्वानां यो विश्वस्य य: शूरेभि: षट्
६ रुद्राणां यह्वा मरुत्वद्वै २ चंद्रमा अप्स्व मिन्नो पुदेवा यज्ञं पृच्छाम्यवमी ये देवा: पंच ५ कद्र्व त स्याहं स: स मा
तपंत्यमी ये सप्तामी ये पंचोक्षण: पंच ५ सुपर्णी न व्यमग्ने तव त्यत्सत्तो होता ब्रह्मा कृणोति पंच ५ असौ
य: त्रित: कूपे अरुणो मा एना गृषिणा चत्वारि ४ इंद्रं मित्रं त आदित्या अवंतु नो नराशंसं बृहस्पत इंद्र कुत्सो
देवैर्न: सप्त ७ यदग्ने वं मदथो यद्गुषु अयमस्यांपरम स्वादिविष्ठ उदित एवेंद्राग्न्यष्टौ ८ ईळे मर्त्युवो
दीना पृथिव्यो युवं तासां धेनुं परि ज्मा त्रिर्मं तु रभंक एवं दत्रा द्वर्च: १० अंतर्क कर्क धुंधुचुंति पश्नि गु ॥३॥
रा वीभिर्वर्तिं कां सिंधुं कुत्सं विरूपत्वां वशमभ्यंदत्रा द्वर्च: १० सुदानू कक्षीवंतं रसा त्रिशो क: सूर्ये वि

कृतराष्ट्वीभ्रि

षं महां पूर्भिद्येषम्न्य अश्वं दत्रा १० नरा त्वा रापठर्वा शार्यात मं गिरो मनुं पत्नी रुद्रासेत्वां तो ती अस्या वंती
दत्रो १० कृत्वा तु नरं कुत्स मश्वस्वती युष्मि रुकुभि: पंच ५ जिस्त स्येय क: क्षत्राय त्वमेषा दिवस्त्राणी ३ ॥
इति प्रथमाष्टक: समाप्त: ॥ १ ॥ प्रहाजिनो यदश्वस्य यद्वध्य त्रीणी ३ अग्ने होतारमतप्यमाने संग छ
माने चत्वारि ४ उवअसमन्युवअपृथ्वी देवान्वा उषासांसा चत्वारि ४ इयत्तिका त्रि: सप्त नवानांत्रि: सप्त मयूर्ये इ
तकं: कुषुंभक: षट् ६ त्वमग्ने द्युभिस्त्वमग्ने इंद्रो राजा त्वष्टा पंच ५ त्वमग्ने रुद्रो द्रविणोदा दम आ पितर मस्मुरा के
पंच ५ त्वमग्न अदिति: स भ्यत आदित्यासस्त्वे अग्ने त्वं तान्येस्तोत भ्य: षट् ६ यो जातो य: पृथिवीं यो हत्वा येनेमा
धंस्सा पंच ५ योरधस्य यस्या श्वासो यं क्रंदसी यस्मान्न ऋते य: शश्वत: पंच ५ य: शंबरं य: सप्तरश्मि द्यावाचि
द: कृत्वं तं य: सुन्वत पंच ५ ऋतुर्जनित्री स ध्रीमायुं त्यन्वेक: प्रजाभ्य: पुष्टिं मधा कृणो: पंच ५ यो भोजनं य:
पुष्पिणीर्यो नार्मरं त्वातं वा यस्य विश्वे दनु: पंच ५ सुप्रवाचनं मरमयो स्मभ्यं त्रीणि ३ अध्वर्यवो यो अपो यो द
भीकं य उरणं य: स्वश्नं य: शातं षट् ६ आ सहस्रं यन्मेर: कर्ते नापयसो यो दिव्यस्या स्मभ्यं षट् ६ प्र घान्वस्य वत्रो स धे
वृस्य वो त्व्हं सद्द महीं पंच ५ सोदंचं स विद्वानिन हत्वं स्वप्नेन नूनं सा ते पंच ५ त्रिकद्रुकेष्व धुल्विषी मान्स्माकं जात

२

स्तवत्यश्चत्वारि ४ इंधानोवांरिरप्सिः सिंधुर्नस्तस्मा अर्षतितत्समाइद्दिश्वं पंच ५ मंदस्वयमुपूर्व्यं मेघंतुतेपाद्वो त्राच
त्वारि ४ इति द्वितीयाष्टकः समाप्तः ॥२॥ उषसः पूर्वामोषुणोअत्रविमेपुरुत्रासमानोराज्ञाक्षित्पूर्वांपंच ५ श्रायुः
पुरस्ताद्धिमाताभूरस्येवनिर्वेवेति विष्णुर्गोपाः पंच ५ नोनाचक्रातेमाताचयत्रान्यस्याववत्सं पृथावस्तेपदेइव
पंच ५ आधेनवोयदन्यासुवीरस्यनुदेवस्त्वष्टामहीसमैरदिमांचनोनिष्विध्वरीः सप्त ७ विहिहोत्रानिर्युवाणोअ
नुकृत्स्ववहंतुत्वावायोनातं पंच ५ अग्निं तेसोअग्निरग्निस्यातेअग्नइधीमहिस्रुचाहविः पंच ५ प्रोत्यतवस्यनवा
नोअग्नउभेसुश्चंद्रएवोअग्निं पंच ५ इति तृतीयाष्टकः समाप्तः ॥३॥ आयाहिवेषाग्नावावृधत्वाशुजी
षीवज्री चत्वारि ४ प्रयज्यवस्त्वयंदधिध्वेसाकंजात आभूषेण्यंउदीरयथाः पंच ५ यदश्वान्पर्वतायत्पूर्व्यंमरुत
नोयूयमस्मान्पंच ५ आमित्रेवृतेनस्तोमित्रश्चनस्त्रीणि ३ प्रतिप्रियतमस्याघातमानोरत्नानिस्कृष्टश्नोवांबोधि
न्मनेसाः पंच ५ आवांनराश्विनोस्मिन्यज्ञेअभूदुषश्चत्वारि ४ अश्विनावहाश्विनाहरिणाविवाश्विनावाजि
नीवसू त्रियंद्वांचत्वारि ४ महेनोअघयासुनीथसानोअद्याभियत्वोयच्चिद्धितेपंच ५ एषुधास्तेष्यो
घुम्नश्रुत नोव्युछाएतावुदेदुषः पंच ५ पस्पत्यघस्यतीव्र स्कृतेयस्यगामस्यमेदानश्चत्वारि ४

श्रीः
२

योरयिवोयः शुग्मघेनवुहस्त्यमुवश्चत्वारि ४ विपृषत्नारिस्वयांपूषत्रीणि ३ ॥ इति चतुर्थाष्टकः॥
॥४॥ समुद्रज्येष्ठायाआपोदिव्यायासांराजायासुराजाश्चत्वारि ४ आमायहिजामन्यछत्स्मलोयाः
प्रवतश्चत्वारि ४ अग्नीवृहायदर्जुनस्तंनरायुत्वंसूकरस्यसस्तुमाताः पंच ५ मोषुवरुणयदेमित्रकृत्वः
समह्यापांमध्ययल्किंचेदं पंच ५ ॥ इति पंचमाष्टकः समाप्तः ॥५॥ यदावृत्रं विस्तुहि यंतापुर्वनान्निय
मिरेमोरुतीः सूर्यभिमांतेयदस्यसुवीर्यभृष्टो ८ वृषायंवषाग्नावावृषात्वात्रीणि ३ एंद्रयाह्यात्वाग्नावा
अत्रावितेमिरात्वाकण्वादधामितेपंच ५ समत्सुरंधिरानोयाह्याताहोतात्वामदच्युतायाह्यर्यः पंच ५
उपश्रुतिमरूपेरायाहिपर्वतेभ्यरानोगव्यानः सहस्रशा आयदिंद्रश्चषद्वृह अग्निनेंद्रेणचसोमंपिब
तंविश्वाभिर्धीभिर्विश्वैर्देवैर्जुषेथांचेषन्नः स्तोमंजुषेथांगिरोजुषेथांषद्वृह हारिद्रवेवत्रिवृर्ति
र्हसाविवत्वयेनाविवपिबतंचोर्जन्नोजयतंहतंषद्वृह मित्रावरुणवंताचादित्ये रंगिरस्वंताऽ
श्रुमंताब्रह्मजिन्वतंसोमेस्कन्वतः क्षत्रं न्हेन्धेनूर्विशः षद्वृह अत्रैरिवाश्विनासगींइवरु

३

त्वमीरिवा र्वाग्न थं नमो वाके स्वाहा कृतस्य षट् ६ अविता सि प्रावकूर्जो देवां जनिता दिवो जनिताश्वो नाम त्रीणां
श्यावाश्वस्य सुन्वतो ब्रह्माणि सप्त ७ प्रेदं ब्रह्मसि हा न एक राट् सस्छावा नाक्षेमस्य चक्ष त्रायत्वं श्यावाश्वस्य रे
भतः क्षत्राणि सप्त ७ यज्ञस्य तस्य तो शासे दं वा जुषेथामागतमिमा जुषेथामिमां गाय त्रवर्त्त निं षट् ६ प्रातर्यावि
भिः सोम पीतये श्यावाश्वस्य सुन्वतो त्रीणामे वा वा माहं सरस्वतीव तो श्वत्वारि ४ अग्निमस्तोषि न्ये ग्ने अग्ने
मन्मा नित त्तेदग्निः स चिकेतः पंच ५ अग्नि र्जाताग्निर्देवेषु यो अग्नि रग्निस्त्रीणि त्वन्नो अग्नेः पंच ५ इं
द्राग्नी युवं न हि वां ता स्पर्य चर्प्र ब्रह्माण्य पि विश्व षट् ६ य दिंद्राग्नी यानुश्वे पूर्व ३ ष्टे तशिशीता सुवृक्ति भिः
स्तं शिन्नीतास्वध्वरमे वेंद्राग्निभ्यां षट् ६ अस्मा उषुत मूषु स क्षपो यः ककुभो यो धत्तीं पंच ५ यस्मिन्विश्वा
नि य आस्वर्कः ससमुद्रो यस्य श्वेताय श्वेता न्यं च ५ आ वां ग्नावाणो यथा वा मे वा वा स्त्रीणि ३ आ घा ये बृह
न्निद युद्ध आ वृंद प्रति त्वा पंच ५ पिंधि विश्वा यद्धीको युस्यते स्त्रीणि ३ महि वो विदा देवांव्य ३ स्मे य ३
स्मा अरासत परिणाव ण जन्यं च ५ परिह्वृतेन तं तिग्म युष्मे देवा अदितिर्नय ह्वे वाः पंच ५ आदित्या अव
नेहस्य द्रं यदा वियं श्वु गो सुनि ष्क वा घा पंच ५ तदन्नाय यथा कुला मजैष्मा स्त्रीणि ३ प्रो अस्मा उप उ ओ अ

हिते ना याहि धृषत श्चिद्वव च षट् षट् ६ विश्वेते गृणो तेस मनेबो ज्ञातमहं चुत्वं च स त्यमिह्वाः षट् ६ उदीराथा
न्निमिषद्दु पस्तरणीतं कुह स्थोयद्द्य कुहिं पंच ५ अश्विनावं तं वरे थे श्रस्तम वेधि रिहागतं पंच ५ किमिदं स
मानेयो वां जो रस्या नो गव्येभिर्मा नो गव्येभिररुणप्स रश्विना सुपुरं न्यष्टौ ८ आ मह्व मिमं मे अ यं वां भृणुतं छर्दि
र्यंतं पंच ५ गच्छतं युजाथां त्रिवंधुरेण नू मे गिरश्चत्वारि ४ उभा हि कु था नूनं युवं हि ष्मा त त्यमृतेन देवः
पंच ५ आ ते दक्ष मा ते दधा मद्रं भद्रं स नो विश्वा त्वामिद्धृ अहं तमप च ५ उप नो हि ता यो त्वं हि इंद्र द्रषश्चत्वारि
४ सनो च सनाज्योतिः सनाद क्षं पवीता रस्त्वं सूर्येनः पंच ५ ज्योक पश्येम अभ्यर्ष स्वाभ्य १ र्षा न त्वा यज्ञे रयिं
नः पंच ५ परि सुवा न स्त्वं विप्रस्त्वं विश्वे आ यो विश्वा नि यद्द्वमे परि यः सश्रुष्मी सप्त ७ ॥ इति षष्ठाष्टकः ॥
तरत्स उत्वा वेद ध्वस्त्रयो राय यो ४ आ ते दक्ष मा मंद्रमा रयिं ३ अयं सोम अयं त आ घृणे वा चो जंतुः ३ नाना
नं वा जरती भिः कारुरहमश्वो वो र्व्हा श्व० ४ शर्यणावत्या पवस्व पर्जन्य वृद्धं तं वदन्नसत्यमुग्रस्य ५ य
त्र ब्रह्मा य त्रज्योति यत्र राजा यत्रानेका मं यत्र कामा यत्रानं ५ य इंदो सषसप्त यत्ते राजन् ४ आ ग्निन्नः गी
रं त्वा मृते स्तजी ति स्व धर्मा णो विश्वा अधि यमग्नि यज्ञे अग्निर्जातो प्रियाय ५ त्वां यज्ञे विश्वाद० दा० ऋ० त्विजं
शुक्रं च० अग्ने शुग गर्भं जा मि ३ इंद्र सामं सह स्त्रिणं त्वो यज्ञे भिः श्रेष्ठं यस्याति द्विपो नः ३ भद्रन्तो रणान्ह दिवि

४

तिष्ठंतो नभ्रता निम्रूकास मुप्र धारया तवस्येभ्रत्नं ५ पभुर्न्नः सोमविश्वासंतन्नः सोमभानोदुःस्त्वंनः सुक्र
तुर्द्वहो नस्त्वंनोयुध्यमानायेघसमतिमर्यं चिप्राभ्र प्रांधंहश्रवुभं०ृयन्नः प्रयाः सित्र तेउ अनमीवाः श्रेष्ठन्नः
पिपर्तुमा द्वेषो आनो बर्हिः ५ तआदित्या तन्नो विश्वेअघ यं दे८ ३ उषासा० विश्वस्मान्नोग्नावा नेंद्रो बर्हिः ५
दिविस्पृशामुपह्वये पापरु सनेमयेस्था ५ महद्दद्य महो अग्नये सवितुः सविता प० ४ इति सप्तमाष्टकेः तमाधः
जगृभ्मा त्वायुधंस भ्रत्ना सनद्दाज मश्वावंतं ५ प्रससवेनी वायत्वा यामि ३ यमे दिवं भूमिं च तत्त्समुद्रं मरीचीः १
अपः सर्पं पर्वतान्विश्वं परा भूतं च ६ प्रतापाभुः सामन्नु षभी ष्ठ १ यीमो षुणो सक नीते म ५ नौ रोदावृद्ध के स मि
द्र १ अयेमा पथ्या पुमथे ये यमा दैन्या १ ग्वातो यमे हस्तः ६ येपृत्त यदुदाजन्य सेतेनापं नोभाविरु
पासः ५ परावता विश्वाहि यूभ्यो न चक्षसः संम्राजः ५ अदितिं स्वस्तये कावो येभ्या होय हेविरि मरेषु सुत्रामाणं ५
विश्वे यजत्रो अपारिष्टा यं देवासः स्वस्तिनः ५ विहि परा हि किमयं यमिमं त्रिया ५ नेमउवे किमु अवीरा संहोधं ५
इंद्राणी नाहंव षा उक्ष्णो वृषभः ५ नसे रेव ते रोमन्वो सदी रं बते अयमयमे मिधन्वपुनरेहियदुदं चुपर्भुहे
इंद्रद्युम्नरा या नो देवइंद्रो अस्मं उक्के नेंद्रस्यतुधन्वा गुहापामीवा मूर्ध्वोग्नावो जेगावः क्रतु प्रावा चिंयस्त ६ इतिवेप्रवा
तो न्मापीतो पमाहं तषेवनहिमेहनहिमेअपिघां हेताहं ओषमिद्दाविमे अहमस्मि गृहः ७ हिरण्यगर्भाय ओं मदाय
प्राणतो पस्येमे येन द्यौः पयं क्रंदस्या पोहयन्विदापो मा नो प्रजापते ५ मोषस्मे तं सिं धूत्वि षुयोनई० तोजनो निदास
तिवयमिंद्रास्मन्यं ७ उने अवस्मावत्या अवयत्वमवस्वेदा दीर्घनाकिर्देवाः ७ सोम स्तेपसा येयुध्यंते ये चित्सहस्त्रा

शिक्षा·
१
॥अथ शिक्षाचतुष्टयप्रारंभः॥
१

शिक्षा

१

॥श्रीगणेशायनमः॥ ॥श्रीवक्रतुंडायनमः॥ ॥ॐ॥ ॥अथशिक्षांप्रवक्ष्यामिपा
णिनीयंमतंयथा॥शास्त्रानुपूर्वंतद्विद्याद्यथोक्तंलोकवेदयोः॥प्रसिद्धमपिशब्दा
र्थमविज्ञातमबुद्धिभिः॥पुनर्व्यक्तीकरिष्यामिवाचउच्चारणेविधिं॥त्रिषष्टिश्च
तुःषष्टिर्वावर्णाःशंभुमतेमताः॥प्राकृतेसंस्कृतेचापिस्वयंप्रोक्ताःस्वयंभुवा॥स्व
राविंशतिरेकश्चस्पर्शानांपंचविंशतिः॥यादयश्चस्मृताह्यष्टौचत्वारश्चयमाःस्मृ
ताः॥अनुस्वारोविसर्गश्चकःपौचापिपराश्रितौ॥दुःस्पृष्टश्चेतिविज्ञेयोॡकारःप्लु
तएवच॥१॥आत्माबुध्यासमेत्यार्थान्मनोयुंक्तेविवक्षया॥मनःकायाग्निमाहंतिस
प्रेरयतिमारुतं॥मारुतस्तूरसिचरन्मंद्रंजनयतिस्वरं॥प्रातःसवनयोगंतंछंदो
गायत्रमाश्रितं॥कंठेमाध्यंदिनयुगंमध्यमंत्रैष्टुभानुगं॥तारंतार्तीयसवनंशी

च

र्षण्यंजागतानुगं॥सोदीर्णोमूर्ध्न्यभिहतोवक्रमापद्यमारुतः॥वर्णाञ्जनयतेतेषांवि
भागःपंचधास्मृतः॥स्वरतःकालतःस्थानात्प्रयत्नानुप्रदानतः॥इतिवर्णविदःप्राहुर्नि
पुणंतंनिबोधत॥२॥उदात्तश्चानुदात्तश्चस्वरितश्चस्वरास्त्रयः॥ह्रस्वोदीर्घःप्लुतइति
कालतोनियमाअचि॥उदात्तेनिषादगांधारावनुदात्तऋषभधैवतौ॥स्वरितःप्रभवा
ह्येतेषड्जमध्यमपंचमाः॥अष्टौस्थानानिवर्णानामुरःकंठःशिरस्तथा॥जिह्वामूलं
चदंताश्चनासिकोष्ठौचतालुच॥ओभावश्चविवृत्तिश्चशाषसारेफएवच॥जिह्वामूलमु
पध्माचगतिरष्टविधोष्मणः॥यद्योभावप्रसंधानमुकारादिपरंपदं॥स्वरांतंतादृशंविद्या
द्यदन्यद्व्यक्तमूष्मणः॥हकारंपंचमैर्युक्तमंतस्थाभिश्चसंयुतं॥औरस्यंतंविजानीयात्कं
ठ्यमाहुरसंयुतं॥कंठ्यावहाविचुयशास्तालव्याओष्ठजावुपू॥स्युर्मूर्द्धन्याऋटुरषादंत्या

शिक्षा

२

ल्नृतुलसाःस्मृताः॥ जिह्वामूले तु कुः प्रोक्तो दंत्योष्ठ्यो वः स्मृतो बुधैः॥ ए ऐ तु कंठतालव्या ओ
औ कंठोष्ठजौ स्मृतौ॥ अर्द्धमात्रा तु कंठ्यस्य एकारैकारयोर्भवेत्॥ ओकारौकारयोर्मा
त्रा तयोर्विवृतसंवृतं॥ संवृतं मात्रिकं ज्ञेयं विवृतं तु द्विमात्रिकं॥ घोषा वा संवृताः सर्वे अघो
षा विवृताः स्मृताः॥४॥ स्वराणामूष्मणां चैव विवृतं करणं स्मृतं॥ तेभ्योपि विवृतावेङौ ता
भ्यामैचौ तथैव च॥ अनुस्वारयमाणां च नासिकास्थानमुच्यते॥ अयोगवाहा विज्ञेया आ
श्रयस्थानभागिनः॥ अलाबुवीणानिर्घोषो दंत्यमूल्यः स्वराननु॥ अनुस्वारस्तु कर्त्तव्यो
नित्यं ह्रोः शषसेषु च॥ अनुस्वारे विवृत्त्यां तु विरामे चाक्षरद्वये॥ द्विरोष्ठ्यौ तु विगृह्णीयाद्य
त्रौकारवकारयोः॥ व्याघ्री यथा हरेत्पुत्रान्दंष्ट्राभ्यां न च पीडयेत्॥ भीता पतनभेदाभ्यां त
द्वद्वर्णान्प्रयोजयेत्॥५॥ यथा सौराष्ट्रिका नारी तक्रँ इत्यभिभाषते॥ एवं रंगाः प्रयोक्त

२

व्याः खे अराँ इव खेदया॥ रंगवर्णं प्रयुंजीरं नो ग्रसेत्पूर्वमक्षरं॥ दीर्घस्वरं प्रयुंजीयात्पश्चा
न्नासिक्यमाचरेत्॥ हृदये चैकमात्रस्त्वर्द्धमात्रस्तु मूर्द्धनि॥ नासिकायां तथार्द्धं च रंग
स्यैवं द्विमात्रता॥ हृदयादुत्करे तिष्ठन्कांस्येन समनुस्वरन्॥ मार्दवं च द्विमात्रं च जघन्वाँ
इति निदर्शनं॥ मध्ये तु कंपयेत्कंपमुभौ पार्श्वौ समौ भवेत्॥ सरंगं कंपयेत्कंपं रथीवेति
निदर्शनं॥ एवं वर्णाः प्रयोक्तव्या नाव्यक्ता न च पीडिताः॥ सम्यग्वर्णप्रयोगेण ब्रह्म
लोके महीयते॥६॥ गीती शीघ्री शिरःकंपी तथा लिखितपाठकः॥ अनर्थज्ञोल्पकंठ
श्च षडेते पाठकाधमाः॥ माधुर्यमक्षरव्यक्तिः पदच्छेदस्तु सुस्वरः॥ धैर्यं लयस
मर्थं च षडेते पाठका गुणाः॥ शंकितं भीतमुद्घुष्टमव्यक्तमनुनासिकं॥ काकस्व
रं शिरसिगं तथा स्थानविवर्जितं॥ उपांशु दष्टं त्वरितं निरस्तं विलंबितं गद्गदितं

शिक्षा

३

प्रगीतं॥ निष्पीडितं ग्रस्तपदाक्षरं च वदेन्न दीनं न तु सानुनास्यं॥ प्रातः पठेन्नित्यमुर
स्थितेन स्वरेण शार्दूलरुतोपमेन॥ मध्यंदिने कंठगतेन चैव चक्राह्वसंकूजितसंनिभे
न॥ तारं तु विद्यात्सवनं तृतीयं शिरोगतं तच्च सदा प्रयोज्यं॥ मयूरहंसान्यभृतस्वराणां
तुल्येन नादेन शिरस्थितेन॥ ७॥ अचोस्पृष्टा यणस्त्वीषन्नेमिस्पृष्टाः शरः स्मृताः॥ शेषाः
स्पृष्टा हलः प्रोक्ता निबोधानुप्रदानतः॥ यमोनुनासिका न ह्रौ नादिनो हझषः स्मृतः॥
ईषन्नादा यणो जशश्च श्वासिनस्तु खफादयः॥ ईषच्छ्वासांश्चरो विद्याद्गोर्धामैतत्प्र
चक्षते॥ दाक्षीपुत्रः पाणिनिना येनेदं व्यापितं भुवि॥ छंदः पादौ तु वेदस्य हस्तौ क
ल्पोथ पठ्यते॥ ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते॥ शिक्षा घ्राणं तु वेद
स्य मुखं व्याकरणं स्मृतं॥ तस्मात्सांगमधीत्यैव ब्रह्मलोके महीयते॥ ८॥ उदात्त

३

माख्याति वृषोंगुलीनां प्रदेशिनीमूलनिविष्टमूर्द्धा॥ उपांतमध्ये स्वरितं धृतं च कनिष्ठि
कायामनुदात्तमेव॥ उदात्तं प्रदेशिनीं विद्यात्प्रचयं मध्यतोंगुलिं॥ निहतं तु कनिष्ठिक्यां
स्वरितोपकनिष्ठिकां॥ अंतोदात्तमाद्युदात्तमुदात्तमनुदात्तं नीचस्वरितं॥ मध्योदात्तं स्वरितं द्व्युदा
त्तं त्र्युदात्तमिति नवपदशय्या॥ अग्निः सोमः प्र वो वीर्यं हविषां स्वर्बृहस्पतिरिंद्राबृहस्पती॥ अ
ग्निरित्यंतोदात्तं सोम इत्याद्युदात्तं प्रेत्युदात्तं व इत्यनुदात्तं वीर्यं नीचस्वरितं॥ हविषां मध्योदा
त्तं स्वरिति स्वरितं॥ बृहस्पतिरिति द्व्युदात्तमिंद्राबृहस्पती इति त्र्युदात्तं॥ अनुदात्तो हृदि ज्ञे
यो मूर्ध्न्युदात्त उदाहृतः॥ स्वरितः कर्णमूलीयः सर्वास्ये प्रचयः स्मृतः॥ ९॥ चाषस्तु वद
ते मात्रां द्विमात्रं त्वेव वायसः॥ शिखी रौति त्रिमात्रं तु नकुलस्त्वर्द्धमात्रकं॥ कुतीर्थादागतं द
ग्धमपवर्णं च भक्षितं॥ न तस्य पाठे मोक्षोस्ति पापाहेरिव किल्बिषात्॥ सुतीर्थादागतं व्यक्तं स्वा

शिक्षा

४

ण्माप्यं स व्यवस्थितं॥ स स्वरेण स वर्क्रेण प्रयुक्तं ब्रह्मराजते॥ मंत्रो हीनः स्वरतो वर्णतो वा मिथ्याप्र
युक्तो न तमर्थमाह॥ स वाग्वज्रो यजमानं हिनस्ति यथेंद्रशत्रुः स्वरतोपराधात्॥ अवक्षरं हना
युष्यं विस्वरं व्याधिपीडितं॥ अक्षता शस्त्ररूपेण वज्रं पतति मस्तके॥ हस्तहीनं तु योधीते स्व
रवर्णविवर्जितं॥ ऋग्यजुःसामभिर्दग्धो वियोनिमधिगच्छति॥ हस्तेन वेदं योधीते स्वरवर्णा
र्थसंयुतं॥ ऋग्यजुःसामभिः पूतो ब्रह्मलोके महीयते॥१०॥ शंकरः शांकरीं प्रादाद्दाक्षीपुत्रा
य धीमते॥ वाङ्मयेभ्यः समाहृत्य देवीं वाचमिति स्थितिः॥ येनाक्षरसमाम्नायमधिगम्य
महेश्वरात्॥ कृत्स्नं व्याकरणं प्रोक्तं तस्मै पाणिनये नमः॥ येन धौता गिरः पुंसां विमलैः शब्दवा
रिभिः॥ तमश्चाज्ञानजं भिन्नं तस्मै पाणिनये नमः॥ अज्ञानांधस्य लोकस्य ज्ञानांजनशलाक
या॥ चक्षुरुन्मीलितं येन तस्मै पाणिनये नमः॥ त्रिनयनमभिमुखनिःसृतामिमां य इह पठेत्प्र
यतश्च सदा द्विजः॥ स भवति धनधान्यपशुपुत्रकीर्त्तिमानतुलं च सुखं समश्नुते दिवीति दिवीति॥

४

॥११॥ ॥अथ शिक्षामात्मोदात्तश्च हकारं स्वराणां यथा गीत्यचोस्पष्टोदात्तं चाषष्ठः शंक
र एकादश॥ ॥इति श्रीवेदनासिकाशिक्षा समाप्ता॥ ॥ॐ॥ ॥पंचसंवत्सरमयं युगा
ध्यक्षं प्रजापतिं॥ दिनर्त्वयनमासांगं प्रणम्य शिरसा शुचिः॥ प्रणम्य शिरसा कालमभिवा
द्य सरस्वतीं॥ कालज्ञानं प्रवक्ष्यामि लगधस्य महात्मनः॥ ज्योतिषामयनं कृत्स्नं प्रवक्ष्या
म्यनुपूर्वशः॥ विप्राणां संमतं लोके यज्ञकालार्थसिद्धये॥ निरेकं द्वादशार्द्धाब्दं द्विगुणं गतसं
ज्ञिकं॥ षष्ट्या षष्ट्या युतं द्वाभ्यां पर्वणां राशिरुच्यते॥ स्वर्कमेके सोमार्कौ यदा साकं सवासवौ
॥ स्यात्तदादि युगं माघस्तपः शुक्लो दिनं त्यजः॥१॥ प्रपद्येते श्रविष्ठादौ सूर्याचंद्रमसावु
दक्॥ सार्पार्द्धे दक्षिणार्कस्तु माघश्रावणयोः सदा॥ घर्मवृद्धिरपां प्रस्थः क्षपाह्रास उद
ग्गतौ॥ दक्षिणे तौ विपर्यस्तौ षण्मुहूर्त्त्ययनेन तु॥ द्विगुणं सप्तमं चाहुरयनाद्यं त्रयोदश॥

रा

ज्यो॰

५

चतुर्थं दशमं चैव द्विर्युग्माद्यं बहुलेप्यृतौ ॥ वसुस्त्वष्टा भगोजश्च मित्रः सर्पाश्विनौ जलं ॥ धा
ता कश्चायनाद्याश्चार्द्धपंचभस्त्वृतुः ॥ भांशाः स्युरष्टकाः कार्याः पक्षाद्वादशकोद्गताः ॥ ए
कादशगुणः स्योनः शुक्लेऽर्द्धं चैंदवायदि ॥ २ ॥ कार्याभांशाष्टकास्थाने कला एकान्नविंशतिः
॥ ऊनस्थाने द्विसप्तती रूद्ध्येदूनसंमिताः ॥ त्र्यहंशी भक्तो षोद्दिवसांशभागश्चतुर्दशस्या
प्युपनीतभिन्नं ॥ भार्द्धेष्विके चाधिगते परेंशो द्वावुत्तमे कं नवकैरवेद्यं ॥ पक्षात्संचदशाच्चो
र्ध्वं तद्भुक्तमिति निर्दिशेत् ॥ नवभिस्तूद्गतोंशास्स्यादूनांशाद्यधिके न तु ॥ जौ द्राघः खेश्वे
ही रोषा चिन्मूषण्यः सोमाधानः ॥ रेमृ धाश्वाप्योज कृष्णो हर्येष्ठा इत्यृक्षालिंगैः ॥
जावाद्यंशैः समं विद्यात्पूर्वार्द्धे पर्वसूत्तरे ॥ भादानं स्याच्चतुर्दशी काष्ठानां देविना कलाः
॥ ३ ॥ कलादशाच विंशास्यात् द्विमुहूर्तस्तु नाडिके ॥ द्वित्रिंशत्तत्कलानां तु षट्शती त्र्यधि

५

=श्र=

कं भवेत् ॥ नाडिके द्वे मुहूर्तस्तु पंचाशत्पलमाषकं ॥ माषकात्कुंभको द्रोणः कुटपैर्वर्द्ध
ते त्रिभिः ॥ ससप्त कुंभयुक् स्योनः सूर्याद्योर्नित्रयोदश ॥ नवमानि च पंचाह्नः काष्ठाः पंचा
क्षरास्मृताः ॥ शूविष्ठाभ्यां गुणाभ्यस्तान्प्राग्विलग्नान्विनिर्दिशेत् ॥ सूर्यान्मासान्षळभ्य
स्तान्विद्याच्चांद्रमसानृतून् ॥ अतीतपर्वभागेषु शोधयेद्द्विगुणां तिथिं ॥ तेषु मंडलभागे
षु तिथिनिष्ठां गतो रविः ॥ ४ ॥ याः पर्वभादानकलास्तासु सप्तगुणां तिथिं ॥ प्रक्षिपेत्कलास
मूहस्तु विद्यादादानकीः कलाः ॥ यदुत्तरस्यायनतोयनं स्याच्छेषंतु यद्दक्षिणतोयनस्य ॥ तदे
वषष्ठ्याद्विगुणं विभक्तं सद्वादशं स्याद्दिवसप्रमाणं ॥ तदर्द्धं दिनभागानां सदा पर्वणि पर्वणि ॥ ऋ
तुशेषंतु तद्विद्यात्संख्याय सह पर्वणां ॥ इत्युपायसमुद्देशो भूयोप्येनं प्रकल्पयेत् ॥ ज्ञेयराशिं गता
भ्यस्तान्विभजेज्ज्ञानराशिषु ॥ अग्निः प्रजापतिः सोमो रुद्रोदितिर्बृहस्पतिः ॥ सर्पाश्च पितर

ज्यो॰

६

श्रवेव भगश्चैवार्यमापि च ॥ ५ ॥ सविता त्वष्टाथ वायुश्चेंद्राग्नी मित्र एव च ॥ इंद्रो निर्ऋतिरापो वै
विश्वेदेवास्तथैव च ॥ विष्णुर्वसवो वरुणोज एकपात्तथैव च ॥ अहिर्बुध्न्यस्तथा पूषा अश्विनौ यम ए
व च ॥ नक्षत्रदेवता एता एताभिर्यज्ञकर्मणि ॥ यजमानस्य शास्त्रज्ञैर्नाम नक्षत्रजं स्मृतं ॥ इत्येतन्
मासवर्षाणां मुहूर्त्तोदयपर्वणां ॥ दिनर्त्त्वयनमासांगं व्याख्यातं लगधोब्रवीत् ॥ सोमसूर्यस्त्रि
चरितो लोकाल्लोके च संमितं ॥ सोमसूर्यस्त्रिचरितो विद्वान्वेदविदश्नुते ॥ ६ ॥ विषुवंतद्गुणं द्व्याभ्यां
रूपहीनं तु षड्गुणं ॥ यल्लब्धं तानि पर्वाणि तथोर्ध्वं सा तिथिर्भवेत् ॥ माघशुक्लप्रवृत्तस्य पौषकृ
ष्ण समापिनः ॥ युगस्य पंचवर्षाणि कालज्ञानं प्रचक्षते ॥ तृतीयां नवमीं चैव पौर्णमासीं त्रयोद
शीं ॥ षष्ठीं च विषुवां प्रोक्तो द्वादश्यां च समं भवेत् ॥ चतुर्दशीमुपवसथस्तथा भवेद्यथोदितो दि
नमुपैति चंद्रमाः ॥ माघशुक्लाह्निको युंक्ते श्रविष्ठायां च वार्षिकीं ॥ यथा शिखा मयूराणां नागा

६

नां मणयो यथा ॥ तद्वद्वेदांगशास्त्राणां ज्योतिषं मूर्द्धनि स्थितं ॥ वेदा हि यज्ञार्थमभिप्रवृत्ताः का
लानुपूर्वा विहिताश्च यज्ञाः ॥ तस्मादिदं कालविधानशास्त्रं यो ज्योतिषं वेद स वेद यज्ञान्यो ज्यो
तिषं वेद स वेद यज्ञानिति ॥ ७ ॥ ॥ पंचसंवत्सरं प्रपद्येते कार्याः कलायाः पर्वसविता विषुवं सप्त ॥
॥ ॥ इति ज्योतिषं समाप्तं ॥ ॥ ॐ ॥ ॥ मयरसतजभनलगसंमितं भ्रमति वाङ्मयं जगति
यस्य ॥ स जयति पिंगलनागः शिवप्रसादाद्विशुद्धमतिः ॥ त्रिगुरुं विद्धि मकारं लघ्वादिसमन्वि
तं यकाराख्यं ॥ लघुमध्यमं तु रेफं सकारमंते गुरुं निबद्धं ॥ लघ्वंत्यं हि तकारं जकारमुभयोर्लघुं
विजानीयात् ॥ आदिगुरुं च भकारं नकारमिह पिंगले त्रिलघुं ॥ दीर्घसंयोगपरं तथा स्वरव्यंज
नांतमूष्मांतं ॥ सानुस्वारं च गुरुं क्वचिदवसानेपि लघ्वंत्यं ॥ आदिमध्यावसानेषु यरता यांति ला
घवं ॥ भजसा गौरवं यांति मनौ तु गुरुलाघवं ॥ त्रिविरामं दशावर्णं षण्मात्रमुवाच पिंगलः सूत्रं ॥ छं

दोवर्गपदार्थप्रत्ययेहेतोश्चव्रसन्नास्वादे ॥१॥ धीश्रीस्त्रीम् ॥ वरासाय् ॥ कागुहान् ॥ वसुधास् ॥ सा
तेक्कत् ॥ कदासज ॥ किंवदन्त ॥ नहसन् ॥ गलौ ॥ गंते ॥ ध्यादिपरः ॥ हे ॥ लौ सः ॥ ग्लौ ॥ अष्टौ
वसवइति ॥२॥ छंदः ॥ गायत्री ॥ दैव्येकं ॥ आसुरी पंचदश ॥ प्राजापत्याष्टौ ॥ यजुषांषट् ॥ साम्नांद्विः ॥
ऋचांत्रिः ॥ द्वौद्वौसाम्नांवर्द्धेत ॥ त्रीन्त्रीनृचां ॥ चतुरश्चतुरः प्राजापत्यायाः ॥ एकैकंशेषे ॥ जह्यादासुरी ॥
तान्युष्णिगनुष्टुप्बृहतीपंक्तित्रिष्टुब्जगत्यः ॥ तिस्रस्तिस्रः सनाम्न्यएकैका आर्च्यः ॥ प्राग्यजुषामार्ष्य
इति ॥३॥ पादः ॥ इयादिपूरणः ॥ गायत्र्यावसवः ॥ जगत्याआदित्याः ॥ विराजोदिशः ॥ त्रिष्टुभोरुद्राः ॥
एकद्वित्रिचतुष्पादुक्तपादं ॥ आद्यंचतुष्पाद्ऋतुभिः ॥ क्वचित्त्रिपादृषिभिः ॥ सापादनिचृत् ॥ षट्कस
प्तकयोर्मध्येऽष्टावतिपादनिचृत् ॥ द्वौनवकौषट्कश्चनागी ॥ विपरीतावाराही ॥ षट्कसप्तकाष्टकैर्वर्द्ध
माना ॥ विपरीताप्रतिष्ठा ॥ तृतीयंद्विपाज्जागतगायत्राभ्यां ॥ त्रिपात्त्रैष्टुभैः ॥ उष्णिग्गायत्रौजागतश्च ॥

ककुम्मध्येचेदंत्यः ॥ पुरउष्णिक्पुरः ॥४॥ परोष्णिक्परः ॥ चतुष्पादृषिभिः ॥ अनुष्टुब्गायत्रैः ॥
त्रिपात्क्वचिज्जागताभ्यांच ॥ मध्येंतेच ॥ बृहतीजागतस्त्रयश्चगायत्राः ॥ पथ्यापूर्वश्चेत्तृतीयः ॥
न्यंकुसारिणीद्वितीयः ॥ स्कंधोग्रीवीक्रौष्टुकेः ॥ उरोबृहतीयास्कस्य ॥ उपरिष्टाद्बृहत्यंते ॥ पुरस्ताद्बृहती
पुरः ॥ क्वचिन्नवकाश्चत्वारः ॥ वैराजौगायत्रौच ॥ त्रिभिर्जागतैर्महाबृहती ॥ सतोबृहतीतांडिनः ॥ पंक्ति
र्जागतौगायत्रौच ॥ पूर्वौचेदयुजौसतःपंक्तिः ॥ विपरीतौच ॥ आस्तारपंक्तिःपरतः ॥५॥ प्रस्तारपं
क्तिःपुरतः ॥ विष्टारपंक्तिरंतः ॥ संस्तारपंक्तिर्बहिः ॥ अक्षरपंक्तिःपंचकाश्चत्वारः ॥ द्वावप्यल्पशः ॥
पदपंक्तिःपंच ॥ चतुष्कषट्कौत्रयश्च ॥ पथ्यापंचभिर्गायत्रैः ॥ जगतीषड्भिः ॥ एकेनत्रिष्टुब्ज्यो
तिष्मती ॥ तथाजगती ॥ पुरस्ताज्ज्योतिःप्रथमेन ॥ मध्येज्योतिर्मध्यमेन ॥ उपरिष्टाज्ज्योतिरंत्येन ॥
एकस्मिन्पंचकेछंदःशंकुमती ॥ षट्केककुद्मती ॥ त्रिपादणिष्ठमध्यापिपीलिकमध्या ॥ विपरीताय

छंद

८

वमध्या॥ऊनाधिकेनैकेननिचृद्भुरिजौ॥द्वाभ्यांविराट्स्वराजौ॥आदितःसंदिग्धे॥दा
देवतादितश्च॥अग्निःसवितासोमोबृहस्पतिर्मित्रावरुणाविंद्रोविश्वेदेवादेवताः॥स्व
राःषड्जऋषभगांधारमध्यमपंचमधैवतनिषादाः॥सितसारंगपिशंगकृष्णनीललो
हितगौरावर्णाः॥अग्निवेश्यकाश्यपगौतमांगिरसभार्गवकौशिकवासिष्ठानिगोत्राणि॥
स्वामान्यतिछंदांसि॥रोचनाभाःकृतयः॥अनुक्तानांकामतोवर्णाइति॥७॥चतुःशतमु
त्कृतिः॥चतुरश्चतुरस्त्यजेदुत्कृतेः॥तान्यभिसंव्याप्तेभ्यःकृतिः॥प्रकृत्याचोपसर्गवर्जितः॥धृ
त्यष्टिशक्वरीजगत्यः॥पृथक्पृथक्पूर्वतःएतान्येवेषां॥द्वितीयंद्वितीयमतितः॥अथलौकि
कं॥आर्त्रेएषाश्चयदार्षं॥पादश्चतुर्भागः॥यथावृत्तसमाप्तिर्वा॥लःसमुद्रागणः॥गोगंत
मध्यादिर्लश्च॥स्वरार्द्धंचार्याद्धं॥अत्रायुङ्ज॥षष्ठोज॥न्लौवा॥न्लौचेत्पदंद्वितीया

८

दि॥सप्तमःप्रथमादि॥अंत्येपंचमः॥८॥षष्ठश्चलः॥त्रिषुगणेषुपादःपथ्यादौच॥विपुलान्या॥चपला
द्वितीयचतुर्थौग्मध्यौजौ॥पूर्वमुखपूर्वा॥जघनपूर्वेतरत्र॥उभयोर्महाचपला॥आद्यर्द्धसमागीतिः॥
अंत्येनोपगीतिः॥उत्क्रमेणोद्गीतिः॥अर्द्धेवस्तुगणआर्यागीतिः॥वैतालीयंद्विःस्वरात्ययुक्पादेयु
ग्वसवोंतेल्गौः॥गोपछंदसिकं॥आपातलिकाभ्गौग्॥शेषेपरेणयुङ्॥साकं॥षट्चामिश्रायुजि॥
पंचमेनपूर्वःसाकंप्राच्यवृत्तिः॥अयुक्तृतीयेनोदीच्यवृत्तिः॥आभ्यांयुगपत्प्रवृत्तकं॥अयुक्चा
रुहासिनी॥९॥युगपरांतिका॥गंताद्विर्वसवोमात्रासमकल्नवमः॥द्वादशश्चवानवासिका॥
विश्लोकःपंचमाष्टमौ॥चित्रानवमश्च॥परयुक्तेनोपचित्रा॥एभिःपादाकुलकं॥गीत्यार्यालः॥शि
खाविपर्यस्तार्द्धा॥लःपूर्वश्चेज्ज्योतिः॥गश्चेत्सौम्या॥चूलिकैकान्नत्रिंशदेकत्रिंशदंतेग्॥साप्येन
नसमालांग्लइति॥१०॥वृत्तं॥सममर्द्धसमंविषमंच॥समंतावत्कृत्वःकृतमर्द्धसमंविषमंच॥ग

छंद॰

॥ ९॥

स्पूर्णं॥ ग्लितिसमानी॥ ल्गौतिप्रमाणी॥ वितानमन्यत॥ पादस्यानुष्टुब्वक्त्रं॥ नप्रथमात्स्नौ॥ द्विती
यचतुर्थयो रश्च॥ वान्यत॥ मद्युत्तुर्थात॥ पथ्यायुजो ज॥ विपरीतैकीयं॥ चपलायुजो न॥ विपु
लायुग्लः सप्तमः॥ सर्वतः सैतवस्य॥ भ्रौ न्तौ च॥ प्रतिपादं चतुर्वृध्या पदचतुरूर्ध्वं॥ गावंतश्चापी
डः॥ ११॥ गावादौ चेत्प्रत्यापीडः॥ प्रत्यापीडेगावादौ च॥ प्रथमस्य विपर्यासे मंजरी लवल्यम तथा
रः॥ उद्गतामेकतस्जौ स्लौ न्सौ ज्गौ भ्नौ ज्लौ ग्स्जौ स्जौ ग॥ तृतीयस्य सौरभकं नौ भ्गौ॥ ललितं नौ
सौ॥ उपस्थितप्रचुपितं प्रथमाद्यम्सौ ज्भौ गौ स्नौ ज्रौ ग्नौ स्नौ ज्जौ य॥ वर्द्धमानं तृतीये नौ स्नौ
न्सौ॥ शुद्धविराळृषभं त्जराः॥ अर्द्धे॥ उपचित्रकं सौ स्लौ ग्भौ भौ ग॥ द्रुतमध्या भौ भौ ग्न्जौ ज्यौ॥
वेगवती सौ स्गौ भौ भौ ग॥ भद्रविराट् त्जौ र्गौ म्सौ ज्गौ ग॥ केतुमती स्जौ स्गौ भ्रौ न्गौ ग॥ आ
ख्यानकी तौ ज्गौ ग्तौ ज्गौ ग॥ विपरीताख्यानकी ज्तौ ज्गौ ग्तौ ज्गौ ग॥ हरिणप्लुता सौ स्लौ ग्न्सौ

॥ ९॥

भ्रौ॥ अपरवक्त्रं नौ र्लौ ग्न्जौ ज्रौ॥ पुष्पिताग्रा नौ यौ न्जौ ज्रौ ग॥ १२॥ यवमती जौ जौ ज्रौ ज्रौ ग॥ त्रि
रवेकान्तत्रिंशादेकत्रिंशादंतेग॥ रवं जा महत्सयुजीति॥ १३॥ यतिर्विच्छेदः॥ तनुमध्या त्यौ॥ कुमार
ललिता ज्सौ ग॥ माणवकाक्रीडितकं भ्तौ ल्गौ॥ चित्रपदा भौ गौ॥ विद्युन्माला मौ गौ॥ भुजग
शिशुभृता नौ म॥ हलमुखी र्नौ स॥ शुद्धविराण्म्सौ ज्गौ॥ पणवो म्नौ य्गौ॥ रुक्मवती भ्मौ स्गौ॥
मयूरसारिणी र्जौ र्गौ॥ मत्ता म्भौ स्गौ॥ उपस्थिता त्जौ ज्गौ॥ एकरूपं सौ ज्गौ ग॥ इंद्रवज्रा
तौ ज्गौ ग॥ उपेंद्रवज्रा ज्तौ ज्गौ ग॥ वाद्यंतावुपजातयः॥ दोधकं भ्सौ भौ गौ ग॥ शालिनी म्तौ तौ
ग्समुद्रऋषयः॥ १४॥ वातोर्मिः म्भौ तौ ग्च॥ भ्रमरविलसितं म्भौ न्लौ ग॥ रथोद्धता र्नौ र्लौ
ग॥ स्वागता र्नौ भ्गौ ग॥ वृत्ता नौ स्गौ ग॥ श्येनी र्जौ र्लौ ग॥ जगती॥ वंशस्था ज्तौ ज्रौ॥ इंद्रवं
शा तौ ज्रौ॥ द्रुतविलंबितं न्भौ भ्रौ॥ तोटकं सः॥ पुटो नौ म्यौ वसू समुद्राः॥ जलोद्धतगति ज्सौ ज्सौ

छंद

१०

रसर्त्तवः॥ भुजंगप्रयातं यः॥ स्रग्विणी रः॥ प्रमिताक्षरा स्जौ स्सौ॥ वैश्वदेवी मौ यौ विंद्रियऋषयः॥ न
वमालिनी न्जौ भ्यौ इति॥१५॥ प्रहर्षिणी म्नौ ज्रौ ग्त्रिकदशकौ॥ रुचिरा ज्भौ स्जौ ग्समुद्रनवकौ॥ मत्त
मयूरं म्तौ य्सौ ग्॥ असंबाधा म्तौ न्सौ गौ विंद्रियनवकौ॥ अपराजिता नौ स्लौ ग्स्वरऋषयः॥ प्रहर
णकलिता नौ भ्नौ ल्गौ च॥ वसंततिलका त्भौ जौ गौ॥ सिंहोन्नता काश्यपस्य॥ उद्धर्षिणी सैतवस्य॥
चंद्रावर्त्ता नौ नौ स्॥ मालश्चेन्नवकौ चेत्॥ मणिगुणनिकरो वस्वृषयः॥ मालिनी नौ म्यौ यू च॥ ऋष
भगजविलसितं भ्रौ नौ नौ ग्स्वरनवकौ॥ हरिणी न्सौ म्रौ स्लौ ग्रससमुद्रऋषयः॥ पृथ्वी ज्सौ ज्सौ य्लौ
ग्वसुनवकौ॥ वंशपत्रपतितं भ्रौ न्भौ न्लौ ग्दिग्ऋषयः॥ मंदाक्रांता म्भौ न्तौ त्गौ ग्समुद्रर्तुस्वराः॥ शिख
रिणी य्मौ न्सौ भ्लौ ग्रुद्राः॥ कुसुमितलतावेल्लिता म्तौ न्यौ यौ विंद्रियर्तुस्वराः॥१६॥ शार्दूलविक्रीडि
तं म्सौ ज्सौ तौ गादित्यऋषयः॥ सुवदना म्रौ भ्नौ य्भौ ल्गौ स्वरऋषिरसाः॥ ग्लिति वृत्तं॥ स्रग्धरा म्रौ भ्नौ

१०

यौ यू त्रिः सप्तकाः॥ भद्रकं भ्रौ न्रौ न्रौ न्गौ दिगादित्याः॥ अश्वललितं न्जौ भ्जौ भ्जौ भ्लौ ग्रुद्रादि
त्याः॥ मत्ताक्रीडा मौ त्नौ नौ न्लौ ग्वसुपंचदशकौ॥ तन्वी भ्तौ न्सौ भौ न्यौ द्विरादित्याः॥ क्रौंचपदा भ्मौ स्भौ
नौ नौ ग्भूतेंद्रियवसुऋषयः॥ भुजंगविजृंभितं मौ त्नौ नौ स्रौ ल्गौ वसुरुद्रऋषयः॥ अपवाहको म्नौ
नौ नौ न्सौ गौ नवकर्त्तुरसेंद्रियाणि॥ दंडको नौ रः॥ प्रथमश्चंडवृष्टिप्रयातः॥ अन्यत्र रातमांडव्या
भ्यां॥ शेषः प्रचित इति॥१७॥ अत्रानुक्तं गाथा॥ द्विकौ ग्लौ॥ मिश्रौ च॥ पृथग्ला मिश्राः॥ वसवस्त्रि
काः॥ ल्द्वौ॥ सेके ग्॥ प्रतिलोमगुणं द्विर्लाद्यं॥ ततो ग्येकं जह्यात्॥ द्विरद्वे॥ रूपे शून्यं॥ द्विः शून्ये॥
तावदर्द्धे तद्गुणितं॥ द्विर्द्व्यूनं॥ तदंतानां॥ एकोने ध्वा॥ परे पूर्णं परे पूर्णमिति॥१८॥ ॥ मयद्वादशा
ध्यीः पंचदशाश्छंदःशोलशा पादः परो लिकृप्रस्तारपंक्तिर्विंशतिर्विंशतिरेकविंशतिर्द्वैतादितो
ऽष्टौ चतुःशतं षष्टो विंशतिर्विंशतिर्युग परोतिकात्र्योदशावृत्तं गावादौ विंशतिर्विंशतिर्यवम

छं८

११

तीत्रीणि यतिर्विंशतिर्वा तोमरेमत्ताद्दशाप्रहर्षिणी विंशतिः शार्दूलविक्रीडितं पंचदशाऽश्वानु
कं सप्तदशाः शादशा॥ ॥इतिछंदः समाप्तः॥ ॥ॐ॥ ॥गौः।ग्मा।ज्मा।क्ष्मा।क्षा।क्षमा।क्षोणी।
क्षितिः।अवनिः।उर्वी।पृथ्वी।मही।रिपः।अदितिः।इळा।निर्ऋतिः।भूः।भूमिः।पूषा।गातुः।
गोत्रेत्येकविंशतिः पृथिवीनामधेयानि॥१॥हेम।चंद्रं।रुक्मं।अयः।हिरण्यं।पेशः।कृशनं।लो
हं।कनकं।कांचनं।भर्म।अमृतं।मरुत्।दत्रं।जातरूपमिति पंचदश हिरण्यनामानि॥२॥अंबरं।
वियत्।व्योम।बर्हिः।धन्व।अंतरिक्षं।आकाशं।आपः।पृथिवी।भूः।स्वयंभूः।अध्वा।पुष्करं।
सगरः।समुद्रः।अध्वरमिति षोडशांतरिक्षनामानि॥३॥स्वः।पृश्निः।नाकः।गौः।विष्टप्।नभ इ
ति षट् साधारणानि॥४॥खेदयः।किरणाः।गावः।रश्मयः।अभीशवः।दीधितयः।गभस्तयः।
वनं।उस्राः।वसवः।मरीचिपाः।मयूखाः।सप्तऋषयः।साध्याः।सुपर्णा इति पंचदश रश्मिना

११

मानि॥५॥आताः।आशाः।उपराः।आष्टाः।काष्ठाः।व्योम।ककुभः।हरित इत्यष्टौ दिङ्नामानि॥६॥
श्यावी।क्षपा।शर्वरी।अक्तुः।ऊर्म्या।राम्या।यम्या।नम्या।दोषा।नक्ता।तमः।रजः।असिक्नी।पयस्व
ती।तमस्वती।घृताची।शिरिणा।मोकी।शोकी।ऊधः।पयः।हिमा।वस्वीति त्रयोविंशती रात्रिनामानि।
॥७॥विभावरी।सूनरी।भास्वती।ओदती।चित्रामघा।अर्जुनी।वाजिनी।वाजिनीवती।सुम्नाव
री।अहना।द्योतना।श्वेत्या।अरुषी।सूनृता।सूनृतावती।सूनृतावरीति षोडशोषोनामानि॥८॥
वस्तोः।द्युः।भानुः।वासरं।स्वसराणि।घ्रंसः।घर्मः।घृणः।दिनं।दिवा।दिवेदिवे।द्यविद्यवीति द्वाद
शाहर्नामानि॥९॥अद्रिः।ग्रावा।गोत्रः।वलः।अश्नः।पुरुभोजाः।वलिशानः।अश्मा।पर्वतः।गिरिः।
व्रजः।चरुः।वराहः।शंबरः।रौहिणः।रैवतः।फलिगः।उपरः।उपलः।चमसः।अहिः।अभ्रं।बला
हकः।मेघः।दृतिः।ओदनः।वृषंधिः।वृत्रः।असुरः।कोशः इति त्रिंशन्मेघनामानि॥१०॥श्लोकः।

नि॰ द॰

१२

धारा। इळा। गौः। गौरी। गांधर्वी। गभीरा। गंभीरा। मंद्रा। मंद्राजनी। वाशी। वाणी। वाणीची। वाणः। पविः। भारती। धमनिः। नाळीः। मेळिः। मेना। सूर्या। सरस्वती। निवित्। स्वाहा। वग्नुः। उपब्दिः। मायुः। काकुत्। जिह्वा। घोषः। स्वरः। शब्दः। स्वनः। ऋक्। होत्रा। गीः। गाथा। गणः। धेना। ग्नाः। विपा। नना। कशा। धिषणा। नौः। अक्षरं। मही। अदितिः। शची। वाक्। अनुष्टुप्। धेनुः। वल्गुः। गल्दा। सरः। सुपर्णी। बेकुरेति सप्तपंचाशद्वाङ्नामानि॥ ११॥ अर्णः। क्षोदः। क्षद्म। नभः। अंभः। कबंधं। सलिलं। वाः। वनं। घृतं। मधु। पुरीषं। पिप्पलं। क्षीरं। विषं। रेतः। कशः। जन्म। बृबूकं। बुसं। तुग्र्या। बर्बुरं। सुक्षेम। धरुणं। सुरा। अररिंदानि। ध्वस्मन्वत्। जामि। आयुधानि। क्षपः। अहिः। अक्षरं। स्रोतः। तृप्तिः। रसः। उदकं। पयः। सरः। भेषजं। सहः। शवः। यहः। ओजः। सुखं। क्षत्रं। आवयाः। शुभं। यादुः। भूतं। भुवनं। भविष्यत्। आपः। महत्।

१२

ऋतं

व्योम। यशः। महः। सर्णीकं। स्वृतीकं। सतीनं। गहनं। गभीरं। गंभरं। ईं। अन्नं। हविः। सद्म। सदनं। योनिः। ऋतस्य योनिः। सत्यं। नीरं। रयिः। सत्। पूर्णं। सर्वं। अक्षितं। बर्हिः। नाम। सर्पिः। अपः। पवित्रं। अमृतं। इंदुः। हेम। स्वः। सर्गाः। शंबरं। अभ्वं। वपुः। अंबु। तोयं। तूयं। कृपीटं। शुक्रं। तेजः। स्वधा। वारि। जलं। जलाषं। इदमित्येकशतमुदकनामानि॥ १२॥ अवनयः। यव्याः। खाः। सीराः। स्रोत्याः। एन्यः। धुनयः। रुजानाः। वक्षणाः। खादोअर्णाः। रोधचक्राः। हरितः। सरितः। अग्रुवः। नभन्वः। वध्वः। हिरण्यवर्णाः। रोहितः। सस्रुतः। अर्णाः। सिंधवः। कुल्याः। वर्यः। उर्व्यः। इरावत्यः। पार्वत्यः। स्रवंत्यः। ऊर्जस्वत्यः। पयस्वत्यः। तरस्वत्यः। सरस्वत्यः। हरस्वत्यः। रोधस्वत्यः। भास्वत्यः। अजिराः। मातरः। नद्य इति सप्तत्रिंशन्नदीनामानि॥ १३॥ अत्यः। हयः। अर्वा। वाजी। सप्तिः। वह्निः। दधिक्राः। दधिक्रावा। एतग्वः। एतशः। पैद्वः। दौर्गहः। औच्चैःश्रवसः। तार्क्ष्यः।

एम

आशुः। ब्रध्नः। अरुषः। मांश्चत्वः। अव्यथयः। श्येनासः। सुपर्णाः। पतंगाः। नरः। ह्वार्याणां। हंसासः। अश्वा इति षड्विंशतिरश्वनामानि॥१४॥ हरी इंद्रस्य। रोहितोग्नेः। हरित आदित्यस्य। रासभावश्विनोः। अजाः पूष्णः। पृषत्यो मरुतां। अरुण्यो गाव उषसां। श्यावाः सवितुः। विश्वरूपा बृहस्पतेः। नियुतो वायोरिति दशादिष्टोपयोजनानि॥१५॥ भ्राजते। भ्राशति। भ्राश्यति। दीदयति। शोचति। मंदते। भंदते। रोचते। ज्योतते। द्योतते। द्युमदित्येकादश ज्वलतिकर्माणः॥१६॥ जमत्। कल्मलीकिनं। जंजणाभवन्। मल्मलाभवन्। अर्चिः। शोचिः। तपः। तेजः। हरः। हृणिः। शृंगाणि। शृंगाणीत्येकादश ज्वलतो नामधेयानि नामधेयानि॥१७॥ ॥गौर्हेमांबरंस्वःस्वेदय आताः श्यावी विभावरी वस्तोरद्रिः श्लोकोर्णव नुयो सो हरी इंद्रस्य भ्राजते जमदिति सप्तदश॥ ॥इति नैघंटे प्रथमोध्यायः॥ ॥ ॥
॥ॐ॥ ॥अपः। अप्नः। दंसः। वेषः। वेपः। विष्ट्वी। व्रतं। कर्वरं। करुणं। शक्म। क्रतुः। करणानि। करांसि।

करिक्रत्। करंती। चक्रत्। कर्त्वे। कर्तोः। कर्तवे। कृत्वी। धीः। शची। शमी। शिमी। शक्तिः। शिल्पमिति षड्विंशतिः कर्मनामानि॥१॥ तुक्। तोकं। तनयः। तोक्म। तक्म। शेषः। अप्नः। गयः। जाः। अपत्यं। यहुः। सूनुः। नपात्। प्रजा। बीजमिति पंचदशापत्यनामानि॥२॥ मनुष्याः। नरः। धवाः। जंतवः। विशः। क्षितयः। कृष्टयः। चर्षणयः। नहुषः। हरयः। मर्याः। मर्त्याः। मर्ताः। व्राताः। तुर्वशाः। द्रुह्यवः। आयवः। यदवः। अनवः। पूरवः। जगतः। तस्थुषः। पंचजनाः। विवस्वंतः। पृतना इति पंचविंशतिर्मनुष्यनामानि॥३॥ आयती। च्यवाना। अभीशू। अप्नवाना। विनंगृसौ। गभस्ती। करस्नौ। बाहू। भुरिजौ। क्षिपस्ती। शक्वरी। भरित्रे इति द्वादश बाहुनामानि॥४॥ अग्रुवः। अण्व्यः। क्षिपः। विशः। शर्याः। रशनाः। धीतयः। अथर्यः। कक्ष्याः। अवनयः। हरितः। स्वसारः। जामयः। सनाभयः। योक्त्राणि। योजनानि। धुरः। शाखाः। अभीशवः। दीधितयः। गभस्तय इति द्वाविंशतिरंगुलिनामानि॥५॥ वश्मि। उश्म

सि। वेति। वेनति। वेसति। वांछति। वष्टि। वुनोति। जुषते। हर्यति। आचके। उशिक्। मन्यते। छन्तसद्। चाक-
नत्। चकमानः। कनति। कानिषदित्यष्टादश कांतिकर्माणः॥६॥ अंधः। वाजः। पयः। श्रवः। पृक्षः। पितुः।
सुतः। सिनं। अवः। क्षु। धासिः। इरा। इळा। इषं। ऊर्क्। रसः। स्वधा। अर्कः। क्षद्म। नेमः। ससं। नमः। आ-
युः। सूनृता। ब्रह्म। वर्चः। कीलालं। यश इत्यष्टाविंशतिरन्ननामानि॥७॥ आवयति। भर्वति। बभस्ति।
वेति। वेवेष्टि। अविष्यन्। बप्सति। भसथः। बब्धां। ह्वरतीति दशात्तिकर्माणः॥८॥ ओजः। पाजः। शा-
वः। तवः। तरः। त्वक्षः। शर्धः। बाधः। नृम्णं। तविषी। शुष्मं। शुष्णं। दक्षः। वीळु। च्यौत्नं। शूषं। सहः। यहः।
वधः। वर्गः। वृजनं। वृक्। मज्मना। पौंस्यानि। धर्णसिः। द्रविणं। स्यंद्रासः। शंबरमित्यष्टाविंशतिर्बल-
नामानि॥९॥ मघं। रेक्णः। रिक्थं। वेदः। वरिवः। श्वात्रं। रत्नं। रयिः। क्षत्रं। भगः। मीळ्हुं। गयः। द्युम्नं।
इंद्रियं। वसु। रायः। राधः। भोजनं। तना। नृम्णं। बंधुः। मेधा। यशः। ब्रह्म। द्रविणं। श्रवः। वृत्रं। ऋत-

मित्यष्टाविंशतिरेव धननामानि॥१०॥ अघ्न्या। उस्रा। उस्रिया। अही। मही। अदितिः। इळा। जगती। शक्व-
रीति नव गोनामानि॥११॥ रेळते। हेळते। भामते। हृणीयते। भ्रीणाति। त्रेपति। दोधति। वनुष्यति। कंपते।
भोजत इति दश क्रुध्यतिकर्माणः॥१२॥ हेळः। हरः। हृणिः। त्यजः। भामः। एहः। ह्वरः। तपुषी। जूर्णिः। म-
न्युः। व्यथिरित्येकादश क्रोधनामानि॥१३॥ वर्तते। अमते। लोटते। लोठते। स्यंदते। कसति। सर्पति। स्यमति।
स्रवति। स्रंसते। अवति। श्चोतति। ध्वंसति। वेनति। मार्ष्टि। भुरण्यति। शवति। कालयति। पेलयति। कंटति।
पिस्यति। विस्यति। मिस्यति। प्रवते। प्लवते। च्यवते। कवते। गवते। नवते। क्षोदति। नक्षति। सक्षति।
म्यक्षति। सचति। ऋच्छति। तुरीयति। चतति। अतति। गाति। इयक्षति। सश्चति। ह्वरति। रंहति।
यतते। भ्रमति। ध्रजति। रजति। लजति। क्षियति। धमति। मिनाति। ऋण्वति। ऋणोति। स्वरति।
सिसर्ति। वेविष्टि। योविष्टि। रिणाति। रीयते। रेजति। दध्यति। दभ्नोति। युध्यति। धन्वति। अरुष

निघं०

१५

ति। आर्यति। ईर्मते। तकति। दायति। ईषति। फणति। हनंति। अर्दति। मर्दति। सर्स्रते। नसते। हर्य
ति। इयर्ति। ईर्त्ते। ईंखते। अयति। श्वात्रति। गंति। आगनीगंति। जंगंति। जिन्वति। जसति। गमति।
ध्रति। ध्राति। ध्रयति। वहते। रथर्यति। जेहते। ष्वःकति। क्षुंपति। प्साति। वाति। याति। द्रुषति। द्रा
ति। द्रूळति। एजति। जमति। जवति। वंचति। अनिति। पर्वते। हंति। सेधति। अगन्। अजगन्। जिगा
ति। पतेति। इन्वति। द्रमति। द्रवति। वेति। हर्यतात्। एति। जगायात्। अप्रुथुरिति द्वाविंशतिं गतिक र्मा
र्मणिः॥१४॥ नु। मक्षू। द्रवत्। ओषं। जीराः। जूर्णिः। शूर्ताः। शूघनासः। शीभं। तृषु। तूयं। तूर्णिः।
अजिरं। भुरण्युः। शु। आशु। प्राशुः। तूतुजिः। तूतुजानः। तुज्यमानासः। अज्राः। साचीवित्।
द्युगत्। ताजत्। तरणिः। वातरंहा इति षड्विंशतिः क्षिप्रनामानि॥१५॥ तळित्। आसात्। अंबरं।
तुर्वशे। अस्तमीके। आके। उपाके। अर्वाके। अंतमानां। अवमे। उपमे इत्येकादशांतिकनामानि॥

१५

॥१६॥ रणः। विवाक्। विखादः। नदनुः। भरे। आक्रंदे। आहवे। आजौ। पृतनाज्यं। अभीके। समीके।
ममसत्यं। नेमधिता। संकाः। समितिः। समनं। मीळ्हे। पृतनाः। स्पृधः। मृधः। पृत्सु। समत्सु। समर्ये।
समरणे। समोहे। समिथे। संख्ये। संगे। संयुगे। संगथे। संगमे। वृत्रतूर्ये। पृक्षे। आणौ। शूरसातौ। वाज
सातौ। समनीके। खले। खजे। पौंस्ये। महाधने। वाजे। अज्म। सद्म। संयत्। संवत् इति षट्चत्वारिंशत्
संग्रामनामानि॥१७॥ इन्वति। नक्षति। आक्षाणः। आनट्। आष्ट। आपानः। अश्नात्। नश्नात्। आन
शे। अश्नुत इति दश व्याप्तिकर्माणः॥१८॥ दभ्नोति। श्नथति। ध्वरति। धूर्वति। वृणक्ति। वृश्चति। कृणव
ति। कृंतति। श्वसिति। नभते। अर्दयति। स्तृणाति। स्नेहयति। यातयति। स्फुरति। स्फुलति। निवपंतु।
अवतिरति। वियातः। आतिरत्। तळित्। आखंडल। दूणाति। रम्णाति। शृणाति। शृम्नाति। तृणेळ्हि।
ताळ्हि। नितोशते। निबर्हयति। मिनाति। मिनोति। धमतीति त्रयस्त्रिंशद्वधकर्माणः॥१९॥ दिद्युत्। नेमिः।

निघं०

१६

हेतिः। नमः। पविः। सृकः। वृकः। वधः। वज्रः। अर्कः। कुत्सः। कुलिशः। तुंजः। तिग्मः। मेनिः। स्व
धितिः। सायकः। परशुरित्यष्टादश वज्रनामानि॥२०॥ इरज्यति। पत्यते। क्षयति। राजतीति चत्वार
ऐश्वर्यकर्मणः॥२१॥ राष्ट्री। अर्यः। नियुत्वान्। इनइन इति चत्वारीश्वरनामानि॥२२॥ ॥अपस्त
अनुष्या आयत्या। युवो वर्म्यं धुस्रावयत्यो जोमघम घ्यारेळंतेहेळो वर्त्ते नुतक्षिद्रण इन्वति दृभ्नो
ति दिद्यद्दिरज्यति राष्ट्री द्वाविंशतिः॥ ॥इति निघंटौ द्वितीयोध्यायः॥ ॥ॐ॥ ॥उरु। तुवि। पुरु। भू
रि। शश्वत्। विश्वं। परीणसा। व्यानशिः। शतं। सहस्रं। सलिलं। कुविदिति द्वादश बहुनामानि॥१॥ ऋ
हन्। ह्रस्वः। निघृष्वः। मायुकः। प्रतिष्ठा। कृधु। वम्रकः। दभ्रं। अर्भकः। क्षुल्लकः। अल्प इत्येकादश
ह्रस्वनामानि॥२॥ महत्। ब्रध्नः। ऋष्वः। बृहत्। उक्षितः। तवसः। तविषः। महिषः। अभ्वः। ऋभुक्षाः।
उक्षा। विहायाः। यह्वः। ववक्षिथ। विवक्षसे। अंभृणः। माहिनः। गभीरः। ककुहः। रभसः। व्राधन्। वि

१६

रप्शी। अद्भुतं। बंहिष्ठः। बर्हिषदिति पंचविंशतिर्महन्नामानि॥३॥ गयः। कृदरः। गर्त्तः। हर्म्यं। अस्तं। पस्त्यं।
दुरोणे। नीळं। दुर्याः। स्वसराणि। अमा। दमे। कृत्तिः। योनिः। सद्म। शरणं। वरूथं। छर्दिः। छदिः। छाया।
शर्म। अज्मेति द्वाविंशतिर्गृहनामानि॥४॥ इरज्यति। विधेम। सपर्यति। नमस्यति। दुवस्यति। ऋध्नोति।
ऋणद्धि। ऋच्छति। सपति। विवासतीति दश परिचरणकर्माणः॥५॥ शिंबाता। शतरा। शातपंता। शिल्गु।
स्यूमकं। शेवृधं। मयः। सुग्म्यं। सुदिनं। शूषं। शुनं। शग्मं। भेषजं। जलाषं। स्योनं। सुम्नं। शेवं। शिवं।
शं। कमिति विंशतिः सुखनामानि॥६॥ निर्णिक्। वव्रिः। वर्पः। वपुः। अमतिः। अप्सः। प्सुः। अप्नः। पिष्टं।
पेशः। कृशनं। पेशस्। अर्जुनं। ताम्रं। अरुषं। शिल्पमिति षोडश रूपनामानि॥७॥ अस्रेमा। अनेमा।
अनेद्यः। अनवद्यः। अनभिशस्त्यः। उक्थ्यः। सुनीथः। पाकः। वामः। वयुनमिति दश प्रशस्यनामानि॥
॥८॥ केतुः। केतः। चेतः। चित्तं। क्रतुः। असुः। धीः। शची। माया। वयुनं। अभिख्येत्येकादश प्रज्ञाना
म

निघं०

१७

मानि॥९॥ बट्। श्रत्। सत्रा। अद्धा। इत्था। ऋतमिति षट् सत्यनामानि॥१०॥ चिकयत्। चाकनत्। अचक्ष्म।
चष्टे। विचष्टे। विचर्षणिः। विश्वचर्षणिः। अवचाकशदिति अष्टौ पश्यतिकर्माणः॥११॥ हिकं। नुकं। सुकं। आ
हिकं। आकीं। नकिः। माकिः। नकीं। आकृतमिति नवोत्तराणि पदानि सर्वपदसमाम्नानाय॥ इदमिव। इदं
यथा॥ अग्निर्न ये। चतुरश्चिद्ददमानात्। ब्राह्मणा व्रतचारिणः। वृक्षस्य नु ते पुरुहूत वयाः। जार आ भगं। मे
षो भूतोऽभियन्नयः। तद्रूपः। तद्वर्णः। तद्वत्। तथेति उपमाः॥१३॥ अर्चति। गायति। रेभति। स्तोभति। गूर्दयति।
गृणाति। जरते। ह्वयते। नदति। पृच्छति। रिहति। कृपायति। कृपण्यति। पनस्यति। पनायते। वल्गूयति। मंद
ते। भंदते। छंदति। छदयते। शशमानः। रंजयति। रजयति। शंसति। स्तौति। योति। रोति। नौति। भनति।
पणायति। पणते। सपति। पपृक्षाः। महयति। वाजयति। पूजयति। मन्यते। मदति। रसति। स्वरति। वेनति।
मंद्रयते। जल्पति इति चतुश्चत्वारिंशदर्चतिकर्माणः॥१४॥ विप्रः। विग्रः। गृत्सः। धीरः। वेनः। वेधाः। कण्वः।

धमति।४

१७

ऋभुः। नवेदाः। कविः। मनीषी। मंधाता। विधाता। विपः। मनश्चित्। विपश्चित्। विपन्यवः। आ
केनिपः। उशिजः। कीस्तासः। अद्धातयः। मतयः। मतुथाः। वाघत इति चतुर्विंशतिर्मेधाविना
मानि॥१५॥ रेभः। जरिता। कारुः। नदः। स्तामुः। कीरिः। गौः। सूरिः। नादः। छंदः। स्तुप्। रुद्रः।
कृपण्युरिति त्रयोदश स्तोतृनामानि॥१६॥ यज्ञः। वेनः। अध्वरः। मेधः। विदथः। नार्यः। सव
नं। होत्रा। इष्टिः। देवताता। मखः। विष्णुः। इंदुः। प्रजापतिः। घर्म इति पंचदश यज्ञनामानि॥१७॥
भरताः। कुरवः। वाघतः। वृक्तबर्हिषः। यतस्रुचः। मरुतः। सबाधः। देवयव इत्यष्टावृत्विङ्नामा
नि॥१८॥ ईमहे। यामि। मन्महे। दद्धि। शग्धि। पूर्द्धि। मिमिड्ढि। मिमीहि। रिरिड्ढि। रिरीहि। पा
परत्। यंतारः। यंधि। इषुध्यति। मदेमहि। मनामहे। मायत इति सप्तदश याच्ञाकर्माणः॥१९॥
दाति। दाशति। दासति। राति। रासति। पृणक्षि। पृणाति। शिक्षति। तुंजति। मंहत इति दश दान

निघं.

१८

कर्माणः ॥२०॥ परिस्रव । पवस्व । अभ्यर्ष । आशिष इति चत्वारो ध्येषणा कर्माणः ॥२१॥ स्वपिति ।
सस्तीति द्वौ स्वपिति कर्माणौ ॥२२॥ कूपः । कातुः । कर्तः । वव्रः । काटः । खातः । अवतः । क्रिविः । सूदः ।
उत्सः । ऋश्यदात् । कारोतरात् । कुशयः । केवट इति चतुर्दश कूपनामानि ॥२३॥ तृपुः । तक्वा । रिभ्वा ।
रिपुः । रिक्वा । रिहायाः । तायुः । तस्करः । वनर्गुः । हुरश्चित् । मुषीवान् । मलिम्लुचः । अघशंसः । वृक इ
ति चतुर्दशैव स्तेननामानि ॥२४॥ निर्ण्यं । सस्वः । सनुतः । हिरुक् । प्रतीच्यं । अपीच्यम् इति षण्नि
र्ण्यांतर्हितनामधेयानि ॥२५॥ आके । पराके । पराचैः । आरे । परावत इति पंच दूरनामानि ॥२६॥
प्रत्नं । प्रदिवः । प्रवयाः । सनेमि । पूर्व्यं । अह्नाय इति षट् पुराणनामानि ॥२७॥ नवं । नूत्नं । नूतनं । न
व्यं । इदा । इदानीम् इति षळेव नवनामानि ॥२८॥ प्रपित्वे । अभीके । दभ्रं । अर्भकं । तिरः । सतः । त्वः ।
नेमः । ऋक्षाः । स्तृभिः । वम्रीभिः । उपजिह्विका । उर्दरं । सूर्दरं । कुंभः । पिनाकं । मेना । ग्नाः । शेपः । वै

१८

तसः । अया । एना । सिषक्तु । सचते । भ्यसते । रेजत इति षड्विंशतिर् उत्तराणि नामानि ॥२९॥ स्व
धे । पुरंधी । धिषणे । रोदसी । क्षोणी । अंभसी । नभसी । रजसी । सदसी । सद्मनी । घृतवती । बहुले ।
गभीरे । गंभीरे । ओण्यौ । चम्वौ । पार्थ्वी । मही । उर्वी । पृथ्वी । अदिती । अह्नी । दूरे अंते । अपारे अपारे इ
ति चतुर्विंशतिर् द्यावापृथिव्योर् नामधेयानि ॥३०॥ ॥ उर्वी १६ न्महद्गृह इरज्यति त्रिंबाता निर्णिगस्तेमा
केलुवर्ट चिकित्कच्छिक्कमिदमिवार्चति विप्रो रेभो यज्ञो भरताईमहे दाति परिस्रव स्वपिति कूप तृपु निर्ण्य
माके प्रत्ने नवं प्रपित्वे स्वधे त्रिंशत् ॥ ॥ इति निघंटौ तृतीयोऽध्यायः ॥ ॥ ॐ ॥ ॥ जहा ॥ निधा ॥ शिताम ।
मेहना । दमूनाः । मूषः । इषिरेण । कुरुतन । जठरे । तितउ । शिप्रे । मध्या । मंदू । ईर्मान्तासः । कायमानः । लोधं ।
शीरं । विद्रधे । द्रुपदे । तुग्वनि । नंसंते । नसंत । आहनसः । अश्वसत् । इष्मिणः । वाहः । परितक्म्या । सुवि
ते । दयते । नूचित् । नूच । दावने । अकूपारस्य । शिशीते । सुतुकः । सुप्रायणाः । अप्रायुवः । च्यवनः । रजः ।

हरः। जुहुरे। व्यंतः। क्राणाः। वात्री। विष्पुणः। जामिः। पिता। शं योः। अदितिः। एरिरे। जस्फरिः। जरते। मंदिने। गोः। गातुः। दंसयः। तूताव। चयसे। वियुते। ऋधक्। अस्याः। अस्येति द्विषष्टिः पदानि॥१॥ सस्निं। वाहिष्ठः। दूतः। वावशानः। वार्यं। अंधः। असश्चंती। वनुष्यति। तरुष्यति। भंदनाः। आहनः। नरः। सोमो। अक्षाः। श्वात्रं। ऊतिः। हासमाने। पड्डिः। ससं। द्विता। व्राः। वराहः। स्वसराणि। शर्याः। अर्कः। पविः। वक्षः। धन्व। सिनं। इत्था। सचा। चित्। आ। द्युम्नं। पवित्रं। तोदः। स्वंचाः। शिपिविष्टः। विष्णुः। आघृणिः। पृथुज्रयाः। अथर्युः। काणुका। अध्रिगुः। आंगूषः। आपांतमन्युः। श्मशा। उर्वशी। वयुनं। वाजपस्त्यं। वाजगंध्यं। गध्यं। गधिता। कौरयाणः। तौरयाणः। अह्रयाणः। हरयाणः। आरितः। व्रंदी। निष्षपी। तूर्णाशं। क्षुंपं। निचुंपुणः। पदिं। पादुः। वृकः। जोषवाकं। कृत्तिः। श्वघ्नी। समस्य। कुटस्य। चर्षणिः। शंबः। केपयः। तूतुमाकृषे। अंसत्रं। काकुदं। बीरिटं। अच्छ। परि। ईं। सीं। एनं। एनां। सृणिरिति चतुर-

शीतिः पदानि॥२॥ आशुशुक्षणिः। आशाभ्यः। काशिः। कुणारुं। अलातृणः। सलल्लूकं। कत्पयं। विस्रुहः। वीरुधः। नक्षद्दाभं। अस्कृधोयुः। निशृंभाः। बृबदुक्थं। ऋदूदरः। ऋदूपे। पुलुकामः। असिन्वती। कपना। भार्ऋजीकः। रुजानाः। जूर्णिः। ओमना। उपलप्रक्षिणी। उपसि। प्रकलवित्। अभ्यर्द्धयज्वा। ईक्षे। क्षोणस्य। अस्मे। पाथः। सवीमनि। सप्रथाः। विदथानि। श्रायंतः। आशीः। अजीगः। अमूरः। शाशमानः। देवो देवाच्या कृपा। विजामातुः। ओमासः। सोमानं। अनवायं। किमीदिने। अमवान्। अमीवा। दुरितं। अप्वा। अमतिः। श्रुष्टी। पुरंधिः। रुशत्। रिशादसः। सुदत्रः। सुविदत्रः। आनुषक्। तुर्वणिः। गिर्वणसे। असूर्ते सूर्ते। अम्यक्। यादृश्मिन्। जारयायि। अग्रिया। चनः। पचता। शुरुधः। अमिनः। जज्झतीः। अप्रतिष्कुतः। शाशदानः। सुप्रः। सुशिप्रः। शिप्रे। रंसु। द्विबर्हाः। अक्रः। उराणः। स्तियानां। स्तिपाः। जबारु। जरूथं। कुलिशः। तुंजः। बर्हणा। ततनुष्टिं। इलीबिशः। कियेधाः। भृमिः। विष्पितः। तुरीपं। रास्पिनः। ऋंजतिः। ऋजुनीती। प्रतद्वसू। हिनोत। चो-

चोष्कूयमाणः।

निघं.

२०

छून्मते। स्कमत्। दिविष्टिषु। दूतः। जिन्वति। अमत्रः। ऋचीषमः। अनर्शरातिं। अनर्वा। असामि। गल्दया। जल्हवः। बकुरः। बेकनाटान्। अभिधेतन। अंकुरः। बतः। वाताप्यं। चाकन्। रथर्यति। असश्चा। आधवः। अनवब्रवः। सदान्वे। शिरिंबिठः। पराशरः। क्रिविर्दती। करूळती। दनः। शरारुः। इदंयुः। काकदेषु। बुंदः। वृंदं। किः। उल्बं। ऋबीसमृबीसमिति त्रयस्त्रिंशदुत्तंपदानि॥३॥ ॥जहा सास्मिमाश्वश्वसाणि स्त्रीणि॥ ॥इति निघंटौ चतुर्थोऽध्यायः॥ ॥ॐ॥ ॥अग्निः। जातवेदाः। वैश्वानर इति त्रीणि पदानि॥१॥ द्रविणोदाः। इध्मः। तनूनपात्। नराशंसः। इळः। बर्हिः। द्वारः। उषासानक्ता। दैव्या होतारा। तिस्रो देवीः। त्वष्टा। वनस्पतिः। स्वाहाकृतय इति त्रयोदश पदानि॥२॥ अश्वः। शकुनिः। मंडूकाः। अक्षाः। ग्रावाणः। नराशंसः। रथः। दुंदुभिः। इषुधिः। हस्तघ्नः। अभीशवः। धनुः। ज्या। इषुः। अश्वाजनी। उलूखलं। वृषभः। द्रुघणः। पितुः। नद्यः। आपः। ओषधयः। रात्रिः। अरण्यानी। श्रद्धा। पृथिवी। अप्वा। अग्नायी। उलूखलमुसले। हविर्धाने। द्यावापृथिवी। विपाट्छुतुद्री। आर्त्नी। शुनासीरौ। देवी जोष्ट्री। देवी ऊर्जाहु

२०

निघं.

२१

तीतिषट्त्रिंशत्पदानि॥३॥ वायुः। वरुणः। रुद्रः। इंद्रः। पर्जन्यः। बृहस्पतिः। ब्रह्मणस्पतिः। क्षेत्रस्यपतिः। वास्तोष्पतिः। वाचस्पतिः। अपांनपात्। यमः। मित्रः। कः। सरस्वान्। विश्वकर्मा। तार्क्ष्यः। मन्युः। दधिक्राः। सविता। त्वष्टा। वातः। अग्निः। वेनः। असुनीतिः। ऋतः। इंदुः। प्रजापतिः। अहिः। अहिर्बुध्न्यः। सुपर्णः। पुरूरवा इति द्वात्रिंशत्पदानि॥४॥ श्येनः। सोमः। चंद्रमाः। मृत्युः। विश्वानरः। धाता। विधाता। मरुतः। रुद्राः। ऋभवः। अंगिरसः। पितरः। अथर्वाणः। भृगवः। आप्त्याः। अदितिः। सरमा। सरस्वती। वाक्। अनुमतिः। राका। सिनीवाली। कुहूः। यमी। उर्वशी। पृथिवी। इंद्राणी।

गौरी।

गौः। धेनुः। अघ्न्या। पथ्या। स्वस्तिः। उषाः। इळा। रोदसीति षट्त्रिंशत्पदानि॥५॥ अश्विनौ। उषाः। सूर्या। वृषाकपायी। सरण्यूः। त्वष्टा। सविता। भगः। सूर्यः। पूषा। विष्णुः। विश्वानरः। वरुणः। केशी। केशिनः। वृषाकपिः। यमः। अजएकपात्। पृथिवी। समुद्रः। अथर्वा। दध्यङ्। मनुः। आदित्याः। सप्तऋषयः। देवाः। विश्वेदेवाः। साध्याः। वसवः। वाजिनः। देवपत्न्यो देवपत्न्य इत्येकत्रिंशत्पदानि॥६॥ ॥अग्निर्द्रविणोदा अश्वो वायुः श्येनोऽश्विनौ षट्॥ ॥इति निघंटौ पंचमोऽध्यायः॥ ॥इति निघंटुकः समाप्तः॥ ॥संवत् १८४३ पिंगळसंवत्सरे पोषकृष्ण१

२१

नि॰ ८

२९

॥ इति शिक्षाचतुष्टयः समाप्तः ॥

२९